न यावद्देति खस्थानं तन्त्री यन्त्रविशारदः ।
अस्यास्त्वष्टादश प्रोक्ताः शारिकाः पूर्व्वसूरिभिः ।
तासां दश तरा अष्टौ दश क्षुद्राः प्रकीर्त्तिताः ॥
एतास्तु तारवादिन्यस्तिष्ठन्ति पदिकोपरि ।
वितस्तिमात्रपदिकाङ्गुष्ठोत्थाप्यस्य गर्भकः ॥
तावत् शून्यस्तु कर्त्तव्यो यथा दण्डे स्थिरो भवेत् ।
मदनस्य च सिक्थस्य योगेन सुदृढीकृता ॥
दृढतौनाश्च शारीणां स्वननोऽयं तत्क्रमात् ।
एतास्तु सर्व्वावयवैः कथितास्त्र्यङ्गुला बुधैः ॥
स्थाप्य दण्डस्य ताः पृष्ठे यथारागस्वरं पुनः ।
मदनस्य च सिक्थस्य योगेन सुदृढीकृताः ।
सर्व्वासां लोहकलिका मस्तके स्युः सुयन्त्रिताः ।
एकाङ्गुलोच्चाः क्षुद्राः स्युरिति शारीविनिर्णयः ॥
एवं विनिर्म्मिता रुद्रवीणा जनमनोहरा ।
अस्यां शिक्षा तु कर्त्तव्या दाक्षिणात्योपदेशतः ॥"
इति सङ्गीतनारायणः ॥

रुद्रसर्गः, पुं, (रुद्रकृतः सर्गः ।) रुद्रकर्त्तृकसृष्टिः । यथा,—
"इदानीं रुद्रसर्गं त्वं शृणु पार्थिवसत्तम ! ।
दशवर्षसहस्राणि तपश्चीर्त्वा महाजले ॥
प्रतिबुद्धो यदा रुद्रस्तदा चोर्व्वीं सकाननाम् ।
दृष्ट्वा शस्यवतीं रम्यां मनुष्यपशुसंकुलाम् ॥
शुश्राव च तदा शब्दानृत्विजां दक्षसद्मनि ।
आश्रमे यज्विनाञ्चोच्चैर्योगस्थैरिति कीर्त्तितान् ॥
ततः श्रुत्वा महातेजाः सर्व्वज्ञः परमेश्वरः ।
चुकोप सुभृशं देवो वाक्यञ्चेदमुवाच ह ॥
अहं पूर्व्वन्तु कविना सृष्टः सर्व्वात्मना विभुः ।
प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ॥
इदानीं केन तत् कर्म्म कृतं सृष्ट्यादिवर्णनम् ।
एवमुक्त्वा भृशं कोपान्ननाद परमेश्वरः ॥
तस्य ता नदतो ज्वालाः श्रोत्रेभ्यो निर्ययुस्तदा ।
तत्र भूतानि वेताला उच्छुष्माः प्रेतपूतनाः ॥
कूश्माण्डा यातुधानाश्च सर्व्वे प्रज्वलिताननाः ।
उत्तस्थुः कोटिशस्तत्र नानाप्रहरणावृताः ॥"
इति वराहपुराणम् ॥

रुद्रसावर्णिः, पुं, द्वादशो मनुः । अस्मिन् मन्वन्तरे सुधामाख्योऽवतारः । ऋतधामा इन्द्रः । हरितादयो देवाः । तपोमूर्त्त्यादयः सप्तर्षयः । देववद्रुपदेवादयो मनुपुत्त्रा भविष्यन्ति । इति श्रीभागवतमतम् ॥ अपि च ।
"द्वादशे रुद्रपुत्त्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्ण्याख्यस्य ये देवा मुनयश्च शृणुष्व तान् ॥
सुकर्म्माणः सुमनसो हरितो रोहितस्तथा ।
सुरापाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
त्रिःप्रकारा भविष्यन्ति एकैकस्त्रिंशको गणः ।
तेषामिन्द्रो हि विज्ञेयो ऋतधामा महाबलः ॥
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु ।
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ॥
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ।
देववान् वामदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान्मित्रदूतश्च भाविनस्तत्सुता मनोः ॥"
इति मार्कण्डेयपुराणम् ॥

रुद्रसूः, स्त्री, (रुद्रं तत्परिमितपुत्त्रं सूते इति । सू + क्विप् ।) एकादशपुत्त्रजननी । यथा,—
"विश्वद्देशपुत्त्रा स्यादेकाधिका तु रुद्रसूः ॥"
इति शब्दरत्नावली ॥

रुद्राक्रीडः, पुं, (रुद्रस्य आक्रीडा देवनं यत्र ।) श्मशानम् । इति त्रिकाण्डशेषः ॥

रुद्राक्षं, क्ली, (रुद्रस्य अक्षि कारणत्वेनास्त्यस्येति । अर्श आदित्वादच् ।) स्वनामख्यातवृक्षबीजम् । तस्य स्थूलत्वं प्रशस्तत्वञ्च यथा,—
"रुद्राक्षं शिवलिङ्गञ्च स्थूलं स्थूलं विशिष्यते ।
शालग्रामो नार्म्मदश्च सूक्ष्मः सूक्ष्मो विशिष्यते ॥"
इति मेरुतन्त्रे ९ प्रकाशः ॥

रुद्राक्षः, पुं, स्वनामख्यातवृक्षः । तत्पर्य्यायः । तृणमेरुः २ अमरः ३ पुष्पचामरः ४ । इति शब्दरत्नावली ॥ तस्य फलपर्य्यायः । शिवाक्षम् १ सर्पाक्षम् २ भूतनाशनम् ३ पावनम् ४ नीलकण्ठाक्षम् ५ हराक्षम् ६ शिवप्रियम् ७ । अस्य गुणाः । अम्लत्वम् । उष्णत्वम् । वातकफशिरोऽर्त्तिभूतग्रहविषनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ शिवपूजायां अस्य मालाधारणमावश्यकम् । यथा, लिङ्गपुराणे ।
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥"
तस्योत्पत्तिर्यथा । संवत्सरप्रदीपे ।
"त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥"
यद्यप्येकादिचतुर्द्दशमुखरुद्राक्षेषु मन्त्रफलविशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमन्त्रावभिधीयेते । यथा,स्कान्दे ।
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥
ह्रूं नमः इति प्रत्येकमष्टोत्तरशतं जप्त्वा शिवाम्भसा प्रक्षाल्य धारणीयम् ।
"विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकं घोरं यावदिन्द्राश्चतुर्द्दश ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्य धारणे आवश्यकत्वं यथा, संवत्सरप्रदीपे ।
"अरुद्राक्षधरो भूत्वा यद्यत् कर्म्म च वैदिकम् ।
करोति जपहोमादि तत् सर्व्वं निष्फलं भवेत् ॥"
स्कान्दे ।
"ध्यानधारणहीनोऽपि रुद्राक्षं धारयद्बुधः ।
सर्व्वपापविनिर्मुक्तः स याति परमां गतिम् ॥"
इत्येकादशीतत्त्वम् ॥
अथ रुद्राक्षमाहात्म्यम् ।
श्रीमहादेव उवाच ।
"इदानीं देवदेवेशि ! मालानां धारणं शुभम् ।
रुद्राक्षस्य च माहात्म्यं वद मे परमेश्वरि ! ॥
श्रीदेव्युवाच ।
"शिखायां हस्तयोः कण्ठे कर्णयोश्चापि यो नरः ।
रुद्राक्षं धारयेद्भक्त्या शिवलोकमवाप्नुयात् ॥
नववक्त्रन्तु रुद्राक्षं धारयेद्वामबाहुना ।
दक्षबाहौ तथा वत्स ! धारयेद्यतमानसः ॥
शिखायां दशनं धार्य्यं कण्ठे च पञ्चविंशतिम् ।
कर्णयोः पञ्च संख्या हृदि चाष्टोत्तरं शतम् ॥
नाभौ सप्त च रुद्राक्षं धारणान्मोक्षभाग्भवेत् ।
रुद्राक्षधारणादेव नरो देवत्वमाप्नुयात् ॥"
शिखायां दशनं द्वात्रिंशत्परिमितम् ॥ तथा ।
"रुद्राक्षं धारयेन्नित्यं भद्राक्षञ्च सुरेश्वर ! ।
रुद्राक्षस्य महाबाहो माहात्म्यं शृणु यत्नतः ॥
एकवक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति ।
अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च ॥
द्विवक्त्रो हरगौरी स्यात् गोवधाद्यघनाशकृत् ।
त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाशयेत् ॥
तुलाराशिं यथा वह्निर्भस्मसात् कुरुते हर ! ।
त्रिवक्त्रोऽपि च रुद्राक्षस्तथा दहति किल्बिषम् ॥
चतुर्व्वक्त्रस्तु धाता स्यात् नरहत्यां व्यपोहति ।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥
षड्वक्त्रो यो गुहः साक्षात् गर्भहत्यां शमेदयम् ।
सप्तवक्त्रो ह्यनन्तश्च स्वर्णस्तेयापहृत् सदा ॥
विनायकोऽष्टवक्त्रः स्यात् सर्व्वानृतविनाशकृत् ।
भैरवो नववक्त्रः स्यात् शिवसायुज्यदायकः ॥
दशवक्त्रः स्वयं विष्णुर्भूतप्रेतपिशाचहा ।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यो भवेदर्कः सर्व्वतीर्थफलप्रदः ।
त्रयोदशमुखः कामः सर्व्वकामफलप्रदः ॥
चतुर्द्दशास्यः श्रीकण्ठो वंशोद्धारकरः स्मृतः ।
यथोक्तन्तेऽपि रुद्राक्षे तथेन्द्राक्षे प्रकीर्त्तितम् ॥
भद्राक्षेऽपि सुरश्रेष्ठ तद्गुणं परिकीर्त्तितम् ॥"
इति योगसारे २ परिच्छेदः ॥
अपि च ।
"निश्छिद्राश्च सुपक्वाश्च रुद्राक्षा धारणे स्मृताः ।
पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् ॥
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा ।
त्र्यम्बकादिकमन्त्रञ्च तथा तत्र प्रयोजयेत् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥
तथा ॐ ह्रीं अघोरे ह्रैं घोरे ह्रूं घोरघोरतरे ॐ ह्रैं ह्रीं श्रीं ऐं सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपिणे ह्रूं ह्रूं ।
अनेनापि च मन्त्रेण रुद्राक्षस्य द्विजोत्तमः ।
प्रतिष्ठां विधिवत् कुर्य्यात् ततोऽधिकफलं लभेत् ॥
ततो यथा स्वमन्त्रेण धारयेद्भक्तिसंयुतः ॥
एकादिचतुर्द्दशवक्त्राणां संस्कारे प्रत्येकं क्रमेण मन्त्रा यथा । ॐ ॐ भृशं नमः । १ । ॐ ॐ नमः । २ । ॐ ॐ नमः ।३। ॐ ॐ ह्रीं नमः । ४ । ॐ ह्रूं नमः । ५ । ॐ ह्रूं नमः । ६ । ॐ ॐ हूं ह्रूं नमः । ७ । ॐ नमः ।८। ह्रूं नमः । ९ । ॐ हं नमः । १० । ॐ ह्रीं नमः ।११। ॐ ह्रीं नमः । १२ । ॐ क्षां क्षौं नमः । १३ । ॐ नमो नमः । १४ ।
"रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि ।